**दिनाङ्क :-25.10.2025**

**प्रात: - 06:55**

## अथ वार्ताः

### ईसीआई-एएमएफः

निर्वाचन-आयोगेन राज्यानां तथा केन्द्र-शासित-प्रदेशानां मुख्य-निर्वाचन-अधिकारिभ्यः निर्देशाः प्रदत्ताः यत् प्रत्येकं मतदानकेन्द्रं मतदान-दिने न्यूनतम-सुविधाभिः, मतदातृसाहाय्येन च सुसज्जितं भवेत् इति। सुनिश्चितं बिहारराज्ये विधानसभानिर्वाचनं अग्रिमे मासे षडेकादश- दिनाङ्कयोः भविष्यति, सप्तराज्येषु उप-निर्वाचनमपि नवेम्बरैकादशे दिनाङ्के भविष्यति। सुनिश्चित-न्यूनतम-सुविधासु पेयजलम्, प्रतीक्षालयः, जल-सुविधा-युक्तः शौचालयः, पर्याप्तः प्रकाशः, पीडब्ल्यूडी इति निर्वाचकानां कृते समुचितस्य प्रवणाय राम्प इत्येताः सन्ति।

### ईसी-परामर्शः

निर्वाचन-आयोगेन राजनैतिकदलेभ्यः अभ्यर्थिभ्यः, प्रचारप्रतिनिधिभ्यश्च निर्वाचने कृत्रिमरूपेण निर्मितानां सूचनानां विषयवस्तूनाञ्च उत्तरदायितापूर्णस्य उपयोगाय आदेशो दत्तः।

### GOVT-NPS UPS निवेश विकल्पः

सर्वकारेण राष्ट्रिय-नूतन-निवृत्ति-व्यवस्था, एकीकृत-निवृत्ति-योजना चेत्येतयोः केन्द्र-सर्वकारीय-कर्मचारिणां कृते निवेश-विकल्पानां विस्तारः अनुमोदितः अस्ति। एतत् केन्द्रसर्वकारस्य कर्मचारिभ्यः, सर्वकारीयेतर-अभिदातृभ्यः उपलभ्यमानानां निवेश-विकल्पानाम् विस्तृत-श्रेण्याः निरन्तर-आग्रहस्य अनुरूपम् अस्ति। एते विकल्पाः सेवानिवृत्ति-योजनायां नम्यताम् वर्धयितुं परिकल्पिताः सन्ति, तथा च कर्मचारिणः व्यक्तिगत-अभिरूच्यनुसारं स्वनिवृत्तिकोषस्य प्रबन्धनम् कर्तुम् अनुमन्यन्ते इति।

### अफगानिस्तान्-देशस्य कुनार्-नद्याः जलबन्धः।

पाकिस्तानेन सह सद्यः एव सीमा-संघर्षस्य कतिपयेभ्यः दिनेभ्यः अनन्तरं, अफगानिस्तान्-देशस्य तालिबान्-नेतृत्वयुतेन प्रशासनेन कुनार्-नद्याः उपरि जलबन्धनिर्माणस्य योजना घोषिता अस्ति। अयमेकः प्रमुखः जलमार्गः अस्ति यः पाकिस्तान्-देशस्य वायव्यप्रदेशं प्रविशति। अफ़गानिस्तान्-देशस्य कार्येण पाकिस्तान्-देशं प्रति जलप्रवाहः प्रतिबन्धितः भवेत् इति अपेक्ष्यते।

अफगानिस्तान्-देशस्य उप-सूचना-संस्कृति-मन्त्री प्रकाशनस्य मुहाजर् फराही इत्येषः सामाजिक-माध्यमे उक्तवान् यत् तालिबान्-सर्वोच्च-नेता हिबतुल्ला अखुन्दज़ादा इत्यनेन अयं आदेशः दत्तः इति।

**छठ पूजाः**

अद्य देशस्य विभिन्नेषु भागेषु चतुर्दिवसीयः छठ्-पूजोत्सवः आरभ्यते। सूर्यदेवस्य, तस्य भगिन्याः छठीमैया इत्यस्याः पूजायै समर्पितः अयं उत्सवः पवित्रतायै, कृतज्ञतायै, कुटुम्बस्य कल्याणाय च महत्त्वं ददाति।

प्रधानमन्त्रिणा नरेन्द्रमोदिना उत्सवेन सम्बद्धानि गीतानि प्रेषयितुं जनाः प्रार्थिताः, येषाम् अग्रिमेषु कतिपयेषु दिनेषु पुनः प्रसारणं सः करिष्यतीति। सामाजिकमाध्यमं स्वीकृत्य प्रधानमन्त्री अवदत् यत्, सम्पूर्णे बिहार्-प्रदेशे च जनाः पूर्वमेव भक्त्या सज्जतायां निमग्नाः सन्तीति।

**पुरुषाणां क्रिकेट् ओ. डि. ऐ.-क्रीडाः**

पुरुष-क्रिकेट्-क्रीडायां, भारत-आस्ट्रेलिया-देशयोः मध्ये त्रि-स्पर्धा-शृङ्खलायाः तृतीयः अन्तिमश्च ओ. डी. आई. इति क्रीडा अद्य सिड्नी-क्रिकेट्-क्रीडाङ्गणे प्रातः नववादनतः भविष्यति।

**WRESTLING-U 23 विश्व चैम्पियनशिपः**

भारतीय-महिला-द्वन्द्वक्रीडा क्रीडिका हंसिका लाम्बा, सारिका मलिक् च सर्बिया-देशे अण्डर्-23 वर्ल्ड्-रेस्लिङ्ग्-चाम्पियन्शिप् इत्यस्मिन् अन्तिमं स्थानं प्राप्तवत्यौ।

**SAAFRANCHI-दिन**

राञ्ची-नगरे चतुर्थस्य दक्षिण-एशियन्-अथ्लेटिक्स्-फ़ेडरेशन् (एस्. ए. ए. एफ्.) इत्यस्य वरिष्ठ-अथ्लेटिक्स्-च्याम्पियन्शिप्-क्रीडायाः उद्घाटने दिने आतिथेयः भारतं त्रीणि स्वर्णपदकानि प्राप्नोत्।

**दिल्ली-वर्षा-प्रदूषणः**

राष्ट्रिय-राजधान्यां वायुप्रदूषणस्य निवारणार्थं दिल्ली-नगरे अस्य मासस्य 28 इत्यतः 30 दिनाङ्कयोः मध्ये कृत्रिम-मेघ-माध्यमेन प्रथमा कृत्रिमवृष्टिः भविष्यति।

**।।इति वार्ता:।।**